International Journal of Sanskrit Research 2021; 7(4): 163-164

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(4): 163-164
© 2021 IJSR
www.anantaajournal.com
Received: 11-05-2021
Accepted: 15-06-2021

**Dr. Manasi Rath**
Lecture in Dharmashastra, At-Bagdevi Sanskrit College, Daliji, Kendrapara, Odisha, India

**Corresponding Author:**
**Dr. Manasi Rath**
Lecture in Dharmashastra, At-Bagdevi Sanskrit College, Daliji, Kendrapara, Odisha, India

# तीर्थस्थानमथुराधामस्य महत्त्वम्

**Dr. Manasi Rath**

**शोधसारः**
अद्यापि विंशशताब्द्या: शेषभागे विकटकलियुगे चोग्राधुनिकवादे पाश्चात्यसभ्यता विमण्डिते काले जना: पापं प्रति शंकिता: भवन्ति । तदर्थं च धर्मशास्त्रस्य मार्गं स्वीकुर्वन्ति । अत: धर्मशास्त्रस्यव्यवस्था सर्वकालिकी । प्रयोजनार्थं कामार्थं च तीर्थस्यावश्यकता सुतरामेव राराजते । समग्रेस्मिन् भारतवर्षे वहुनि तीर्थस्थानरूपेण पुराणादिषु प्रवर्णितं विद्यते । तत्र मस्तिकजना: भक्तिभावनाया पूजाजप स्नानादिकं च विद्याय स्वबाञ्छितानि फलानि लभन्ते । बहुविधेषु तीर्थेषु हिन्दधर्मस्य सप्तप्रमुखस्थानानि विद्यन्ते । यथा:

"अयोध्या मथुरा माया काशी काञ्ची ह्यवन्तीका ।
पुरीद्वारावती चैव सप्तैता: मोक्षदायका: ।। इति ।"

**कूटशब्दाः** तीर्थस्यावश्यकता, चोग्राधुनिकवादे, स्वीकुर्वन्ति, धर्मशास्त्रस्यव्यवस्था

## प्रस्तावना

महाराजशुरसेनराज्यस्य मुख्यराजधानी भवति
मथुरा । अस्या: नगर्या: विषये न कश्चन वैदिकसंकेत: प्राप्यते । परन्तु अस्य पुराणप्रसिद्धस्य तीर्थस्य विषये ख्रीष्टपूर्वपश्चमशताब्दीत: मथुराया: अस्तित्वं सिद्धं विधते । बौद्धकालेपि अस्या: नगर्या: प्राधान्यमासीत् । यत: तस्यामेव नगर्यां बुद्धदेवस्य विशिष्टेन शिष्येन महाकच्छायनेन मथुरायां स्वकीयस्य गुरो: उपदेशाश्चाध्यापिता: । चीनपरिव्राजकेन मेघास्थिन्समहोदयेन मथुरानगरीविषये तथा च भगवत: श्रीकृष्णस्य विषये ज्ञानं लब्धम् । जैमिनीयपूर्वमीमांसासुत्रेपि मथुराशब्द: प्राप्यते । यस्यार्थ: मथुरानिवासी अथवा तस्मादुत्पत्र: जन: । पाणिनीयसूत्रेपि अस्य प्रयोग: दृश्यते । पाणिनिना वासुदेव-अर्जुन-गोविन्दादीनां प्रयोग: कृत: । यथा वार्त्तिके दृश्यते-' गावि च विन्दे संज्ञायाम् ' । पातञ्जलमहाभाष्येपि मथुराशब्द: बहुवार: प्रयुक्त: । बहुस्थानेषु वासुदेवेन कंस: निहत: नाटकेषु प्राप्यते । मथुरानगरीं सौर्यपुरमिति उत्तराध्यनसुत्रे प्रतिपादितं विधते । आदिपर्वाणि महाभारते धेनूनां कृते मथुरा प्रसिद्धा इति उल्लेखो विधते । सभापर्वाणि प्रतिपादितमस्ति यत् जरासन्धस्य सेनापति: डिम्भक: यदा यमुनायां मृत: तदा जरासन्धो दु:खितो भूत्वा मगधं जगाम,तदा च कृष्ण: उवाच यत्-अधप्रभृति वयं सर्वे प्रसत्रेन मथुरायां स्थातुं शक्नुम: । परन्तु तस्मित्रेव सभापर्वाणि विधते यत् जरासन्ध: वारंवारम् आक्रमणं कृत्वा मथुरानगरीं कष्टं दत्तवान्,तदा श्रीकृष्ण विरक्तो भूत्वा यादवान् गृहीत्वा द्वरीकायां स्थापयासाम: । ब्रह्पुराणे विधते श्रीकृष्णस्य सम्मत्या: यादवा: कालयवनस्य भयेन मथुरां त्यक्तवन्त: ।

रामायणेपि मथुराविषये प्राप्यते यत्-शत्रुघ्नेन द्वादशवर्षाणि यावत् मथुराराज्यं शासनं कृतम् । रघुवंशेपि कथेयमायाति । कलिङ्गराजेन खारबेलेन इयं नगरी विजिता इति शीलालेखत: प्राप्यते । ऐतिहासिकतथ्यानुसारं मथुरा एका समृद्धिशालिनी नगरी आसीत् । प्राचीनकालादारभ्य ख्री.पू. षष्ठशताब्दीं यावत् तत्र हिन्दुमहाराजानां शासनमासीत् । अग्निपुराणे प्राप्यते यत् श्रीरामस्याज्ञया भरतेन मथुरायां शैलूषस्य कोटित्रयपुत्राणां हननं कृतम् । यथा-

"अभुतपूर्वमथुरा काचिद्रामोक्तो भरतोवधीत् ।
कोटित्रयञ्च शैलूष पुत्राणां निशितै: शरै: ।।
शैलूषं दृप्तगन्धर्वसिन्धुतीरनिवासिनम् ।।"

मथुराविषये वराहपुराणे आगच्छति यत्-स्वयं विष्णु: कथयति पृथिव्यां पाताले च एतादृशं मथुरासमं स्थान नास्ति । मथुरा मम प्रसिद्धं स्थानं मुक्तिदायकमेतस्मादतिरिक्तं नाधिकं मे कुत्रापि
रोचते ।पद्मपुराणे आगच्छति यत् -
"तस्मान्मथुरकं नाम विष्णोरेकान्तवल्लभम् ।।"इति ।
पद्मपुराणे आदिखण्डे प्राप्यते यत् यमुना यदा मथुराया सम्मिलिता भवति,तदा अमृतदायिनी
भवति । अत एव यमुना मथुरायामेव पुण्यफलं ददाति । अस्या: मथुराया: परियोजनं तु विंशति योजनमासीदिति नारदीयपुराणे उत्तरखण्डे प्राप्यते ।

"विंशतिर्योजनानां तु माथुरं परिमण्डलम् ।
तन्मध्यं मथुरा नाम पुरी सर्वोत्तमोत्तमा" ।। इति ।

मथुरासमीपवर्त्तिनी कानिचित् तीर्थान्योपि विधन्ते,यानि चतुर्विंशत्युपवनानीति पश्चात्कालिकग्रन्थेषु प्राप्यन्ते । तेषूपवेषु वृन्दावनमन्यतमम् । इदं तावत् वृन्दावनं यमुनाकूले मथुराया: उत्तरपश्चिमदिग् भागे पञ्चयोजनपरिमितमासीत् । वृन्दावनं तु नन्दनन्दनस्य भगवत: श्रीकृष्णस्य भगवत: साद्रूपस्य लीलापुरुषोत्तमस्य लीलाभूमि: भवति । इदं तावत् स्थानं पृथिव्यां वैकुण्ठपुरं भवति । अस्मिन् प्रसङ्गे विष्णुपुराणे नारदीयपुराणे पद्मपुराणे मत्स्यपुराणे वराहपुराणे श्रीमद्भागवते च बहुवर्णनं प्राप्यते । हरिवंशे रघुवंशे च वृन्दावनस्य स्थिति: कृष्णतत्त्वस्य परमप्रचारक: भगवान् चैतन्यदेव: वृन्दावनस्य महिमा वर्णितवान् । इदं स्थानं तु भगवत: श्रीकृष्णस्य परमपावनं धामं तदर्थं वैष्णवा: जना: चैतन्यभक्ति सम्प्रदाया: आगतवन्त: । मन्ये वैष्णवसम्प्रदाया: यावन्त: परिव्राजका: महापुरुषा: सर्वेपि वृन्दावनस्य गुणकीर्त्तने रजलेपनेन च आत्मानं धन्यधन्यं स्वीकुर्वन्ति । वृन्दावनस्य विषये श्रीमद्भागवते रासपञ्चाध्यायिमध्ये सुन्दरं कृष्णकथावर्णनं प्राप्यते । अनेके वैष्णवसम्प्रदाया: कवय: राधाकृष्णमिलनकथां वृन्दावनस्य कदम्बमूलं यमुनाया: सुनीलं जलमतीव चमत्कारेण वर्णयन्ति । गीतगोविन्दकाव्ये परमवैष्णवेन महाकविजयदेवेन राधामाधवयो: मिलनगाथाप्रसङ्गे यमुनाया: तत्रस्थितस्य कदम्बमूलस्य कुञ्जवनस्य यमुनाजलस्य वर्णनं भक्तिभावेन रसमञ्जुलं पधमुपस्थापितम् । अस्मित्रेव भारतेवर्षे एतादृश: जन: नास्ति य: भगवत: श्रीकृष्णस्य न जानाति । अधापि विंशशताब्धारन्तिमभागे विश्वस्य सर्वोत्कृष्टदेशे आमेरिकायामपि भगवत: श्रीकृष्णस्याराधानं कीर्त्तनं पूजनं प्रचलति ।

अत एव मथुरायां कंसस्य राजधान्यां भगवत: श्रीकृष्णस्य जन्मग्रहणमभूत् । वसुदेवसुतत्वात् भगवान् श्रीकृष्ण: वासुदेव इत्यच्यते । भगवत: जन्मस्थानमिति कृत्वा धामस्यास्य महत्त्वं पावनत्वं स्वर्गदायकत्वं च सिद्धं भवति । यधापि यवना: म्लेच्छा: अस्मित्रेव स्थाने स्वप्राधान्यं प्रदर्शितवन्तस्तथापि सा मथुरा तच्च वृन्दावनं नितरामेव कृष्णभक्तानां पुण्यपीठमिति नास्ति काचित् विप्रतिपत्ति: । यधप्यधुना कृष्णवेणुनिस्वनं नायाति,यधप्यधुना यमुना पुलकिता न भवति,तादृशं च कदम्बमूलं यधपि न शोभते,एतेषां सर्वेषामभावेपि कृष्णगतप्राणा: जना: स्वभावराज्ये सर्वामपि कृष्णलीलां मुहुर्मुहु: नीरवच्छित्रेनानुभवन्ति ।

**References**

1. Dr. Atul Kumar Nanda (Book-("Tirthsarasamgraha"), Dr. Dayanidhi Mishra (Book-("Samskarbimarshah"), Dr.Biswanath Swain (Book-"Kalasarvaswa")